SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

# ॥ पूर्वोद्भासः ॥

विश्वेस्मिन् सकलमनुजानामशेषफललब्धिकारणन्तु धर्मा–र्थकाममोक्षमेव वरीवर्ति । तत्र प्रथमपुरुषार्थेन एव अवशिष्टत्रयाणां सिद्धिः सम्पादनीया । अतो नूनं प्रथमपुरुषार्थः प्राधान्यमावहते । हिन्दुसंस्कृतौ धर्मतत्त्वं मूलाधाररूपेण विद्यते । तत्र 'वेदा एव प्रमाणमि'ति धिषणया तद्गतप्रामाण्यमेव महर्षिभिरुररीकृतम् । वेदानाम् जनसाधारणबोधाविषयत्वात् ब्राह्मणाऽऽरण्यक–श्रुति–स्मृतिपुराणग्रन्थाः प्रणिनिन्युः महर्षयः । तथैव सामान्यजनज्ञानाय लोककथोपनिबद्धं रामायणमहाभारतं संरचयामासुः । अतः रामायणं धर्मतत्त्वं विनिश्चितुं प्रधानसाधनं लोकानाम् ।

यथा अधिरत्नाकरे संसारस्य कोटिपरिमितरत्नान्वेषकाः प्रयतामासुः केचन च फलसिद्धिं प्रापुः । तथापि अधुना रहस्यमयसमुद्रः सर्वान् आमन्त्रयति । तथा रामायणे अपि अनेकधर्मतत्त्वबोद्धृभिः समालोचकैश्च धर्मतत्त्वमादाय विषयावगाहनमकारि । किन्तु विषयबाहुल्यात् अधुनाऽपि अवकाशो वर्तते इति विचिन्त्य **"मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः"** इति कालिदासपदमुरीकृत्य **"रामायणे धर्मतत्त्वविमर्शः"** इत्याख्या शोधचिकिर्षा कार्यशरीरे प्रस्थापयितुं प्रारब्धा।

षडध्यायात्मकोऽयं शोधप्रबन्धः यथाविधि सोपानबद्ध उपनिबद्धः । विषयादौ संस्कृतवाङ्मये वाल्मीकिरामायणस्य किं महत्त्वमिति जिज्ञासोदेति चेद् यावद् महत्त्वं संस्कृतवाङ्मये वेदादीनां वरीवर्तते तावदेव महत्त्वं रामायणस्य प्रायोगिकोपदेशपरत्वात् ।

SMT HANSA MEHTA LIBRARY The M S University of Baroda

तत्रभवान् महर्षिः प्रोवाच–

**"यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।**

**तावद् रामायणकथा लोकेषु प्रचरिष्यति ॥[१]"**

चतुर्विधपुरुषार्थप्राधान्याद् आदिकालतः लोकादृतमिदम्महाकाव्यम् । यथार्थमेव भणितिः स्कन्दपुराणे–

**"धर्मार्थकाममोक्षाणां साधनं च द्विजोत्तमाः।**

**श्रोतव्यं च सदा भक्त्या रामायणपरामृतम् ॥[२]"**

ग्रन्थगतविषयविवेचनं द्वारीकृत्य शोधप्रबन्धप्रवर्धनमावश्यकम् । विषय-बाहुल्याद् अत्र प्राधान्यं भजमानानां दिङ्मात्रेण निर्देशो दर्शितः । यथा-रामायणगतधर्मस्वरुपम्–मोक्षतत्त्वम्–दैवपुरुषवादौ–विज्ञानतत्त्वम्–यथार्थवादादर्श-वादौ–ईश्वरजीवप्रकृतिस्वरुपम्–दर्शनिकोयोगिजीवनसन्देशप्रभृतयः । विषयाङ्गतया च ग्रन्थकर्तृकृत्योरितिवृत्तोद्भवौ प्रपञ्चितौ । अधिरामायणं धर्मतत्त्वान्वेषणावसरे प्रसङ्गसङ्गत्या अन्यतत्त्वानाम्मर्षणमपि स्थानमपेक्षत इति धिया "ऋषिसहस्रदक्षिणे"ति भाष्योक्तन्यायेनादौ ग्रन्थगतकाव्यतत्त्व–व्याकरणतत्त्व–दार्शनिकतत्त्वप्रभृतीनां वर्णनमुपन्यस्तम् । तथा च शोधविषयमभिलक्ष्य धर्मतत्त्वविमर्शस्य बीजवपनमप्यकारि ।

---

१. वाल्मीकिरामयणम् १/२/३६

२. स्कन्दपुराणम् (उत्तरखण्डः १/२४)

शोधप्रबन्धस्यास्य शीर्षकघटकधर्मशब्दस्य कात्स्र्येन स्वरुपविवरणमति-दुष्करम् । उक्तञ्च-

**"सूक्ष्मा गतिर्हि धर्मस्य बहुशाखाह्यनन्तिका ।[१]"**

एतद्भावमेव द्विर्बद्धं कृतं श्रीमद्भगवद्गीतायाम्-**"धर्मस्य तत्त्वं निहितं गुहायाम्"।** धर्मशब्दस्य परिभाषा भेदोपभेदवर्णनन्नूनं सहायकृद्भवति धर्मतत्त्वावबोधाय । तत्र वर्णधर्मऽऽ-श्रमधर्मप्रभृतीनां प्रकीर्णधर्माणाञ्च विशदतया विवरणं निश्प्रचं शोधशीर्षकं सरलीकरोति । विश्वेस्मिन् विश्वे धर्मस्य विविधस्वरूपेषु सर्वानुगता धर्मव्याख्या का ? इति प्रश्नजिज्ञासायां सर्वथा मौलिकतां भजमानः शोधांशः प्रबन्धमिदमलङ्करिष्यत इत्याशाषे ।

तत्रभवान् मुनिप्राचेतसः रामायणनिष्ठधर्मतत्त्वविमर्शेण सह वेदेषु-श्रुति-स्मृति-पुराणेतिहासप्रभृतिषु च धर्मतत्त्वं तत्स्वरुपं विविधभेदविवरणञ्च शोधप्रयत्नमुपकुरुते ।

धर्मशब्दः क्रियापरत्वाद् व्यापारप्रदेशमपेक्षते । अतः धर्मस्य विविधक्षेत्रेषु-कर्मविषयको धर्मः, क्रियापरको धर्मः, सामाजिको धर्मः, समसामायिको धर्मः उपनिबद्धः । उक्तञ्च-

**"लोकयात्रार्थमेवेह धर्मप्रवचनं कृतम् ।**

**अहिंसासाधुहिंसेति श्रेयान् धर्मपरिग्रहः** ॥(महाभारतम्)

१. वेदव्यास (महाभारतम्, वनपर्व, २०९/२)

SMT. HANSA MEHTA LIBRARY

अपरञ्च देवीभागवतेऽपि निगदितम्–

**"ग्रामधर्मा जातिधर्मा देशधर्माः कुलोद्भवाः ।**

**परिग्राह्या नृभिः सर्वे नैव तांल्लंघयेन्मुनेः ॥[1]"**

क्रिया–कर्म–सामाजिक–समसामायिकधर्माणां समालोचनेन धर्मार्थस्य परिधिः सुविस्तृता सुस्पष्टा च भवति । अधुना सकलशास्त्रगतधर्मस्वरुपं लाघवविस्तारेण वा परिचर्च्य प्राप्तावसरे धर्मस्वरुपस्य विशदवर्णनं करिष्ये । ऐहिकपारलौकिकतत्त्वानां सारं धर्म एव वरीवर्तते । महर्षिवाल्मीकिः प्राह–

**"धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम् ।**

**धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥[2]"**

अपि च जगाद–

**"धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः ।**

**यः स्यात् धारणसंयुक्तः स धर्म इति निश्चयः ॥[3]"**

धर्मविषये वैमत्यं यथा अधुना वर्तते तथा पूर्वकालेऽपि आसीत् । विषयेऽस्मिन् महर्षिवाल्मीकिना प्रदत्तः सङ्केतः विवादे दोषशमनहेतुः भवितुमर्हति, तेषां रहस्यमूलः श्लोको वर्तते यत्–

---

१. देवीभागवतम् ११/१/१७

२. वाल्मीकिरामायणम् ३/९/३०

३. महाभारतम् शान्ति० १०९/११

**"श्रुतिधर्म इति ह्येके नेत्याहुरपरे जनाः ।**

**न च तत्प्रत्यसूयमानो न हि सर्वं विधीयते ॥[१]"**

प्रबन्धेऽस्मिन् यथाशक्ति वर्णितधर्मसन्दर्भा अपि ग्रथिताः सन्ति । प्रान्ते वेदरामायणयोः धर्मतत्त्वे **"श्रुतिधर्म इति ह्येके....।"** इति श्लोकेन वेदगतसकलधर्मरहस्यस्य विधानराहित्यं सूचितम् । अनेन धर्मविषये महर्षिणा लोकव्यवहारनिर्वाणाय अन्यग्रन्थानाम् उपयोगिता प्रतिपादिता ।

अत्र प्रबन्धेऽस्मिन् यथाप्रयत्नं यथामति रामायणस्वरुपसमुद्रात् धर्मतत्त्वविमर्शणात्मकचिन्तनरत्नं भवतां पुरस्ताद् प्रस्तौतुं भृशमानान्दमनुभवामि ।

पूर्वोल्लासस्य समाप्तितः पूर्वमुपकर्तॄणां स्मरणं परमावश्यकम् । यतो हि अस्माकम् आर्यसंस्कृतौ अचेतनपदार्थस्यापि ऋणं प्रति धन्यवादान् प्रयच्छामः; तर्हि चेतनस्य तु का कथा ? महाकविभासस्य भणिति अवसरेऽस्मिन् प्रेरिका एव–

**"तिर्यग्योनयोऽप्युपकृतमवगच्छन्ति ।[२]"**

तत्र प्रथमं काशीस्थानां राष्ट्रपतिपुरस्कृतानां पाण्डित्यपरम्परासंवाहकानाम् अभिनवपाणिनिसदृशाणाञ्च पू.श्रीरामयत्न शुक्लमहाभागानाम् स्मरणं वन्दनं च व्याहरामि । येषां स्मरणमात्रेणैव काश्यारुदात्तपाण्डित्यपरम्परा स्मृतिपथे आयाति । मम बालसखा तथा प्राध्यापश्च योगेश त्रिवेदीमहोदयस्य कार्तज्ञ्यं बिभर्मि । येन

१. महा०शान्तिपर्व १०९/१३

२. स्वप्नवासवदत्ता ६/१८

सर्वदा ज्येष्ठभ्रातृवत् स्थाने- स्थाने परामर्शः प्रदत्तः । एतस्मिनवसरे पारुल आयुर्वेद महाविद्यालस्य प्राचार्या डॉ.लीना शुक्ला भगीनीनां विशेषाभारः । याः सर्वदा सहाय्यमकुर्वन् । तत्रत्येव डॉ.सतीष तथा डॉ.अमीतमहोदयौ विशेषधन्यवादार्हौ । एताभ्यां सङ्गणककार्ये सहायता प्रदत्ता । पित्रोश्च आशीर्वादास्तु सन्त्येव । शोधकार्येऽस्मिन् उत्साहवर्धनाय प्रेरणाप्रदात्र्याः मम धर्मपत्न्या अपि सहायता वरीवर्तते, यया गृहभारात् विमुक्तिः प्रदत्ता ।

एतेषाम् उपरिस्थानां कार्तज्ञ्यं ज्ञापितवान् परन्तु सदैव छात्राऽनुकूल्यमेव स्वानुकूल्यं मन्यमानानां संस्कृतानुकूलसंस्कृतिसंवाहकानां मम शोधकार्य-निर्देशकानां प.पू.डॉ.रामपाल शुक्लागुरुचरणानां नाऽक्षरैः शब्दैर्नवाऽन्यप्रकारैश्च कृतज्ञतां ज्ञापयितुं शक्नोमि । एतैः पदे-पदे च दिशानिर्देशः कृतः । एतेषां चिरजीवनाय प्रार्थनां करोमि । येन देववाण्याः संस्कृतेश्च संवर्धनं भवेत् ।

अन्ते च कायधर्मत्वात् शोधप्रबन्धेऽस्मिन् ये केचन दोषाः स्युस्ते क्षन्तव्याः सूचनीयाश्च ।

**गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।**

**हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥**

**विद्वच्चरणचञ्चरीकः**

**(जतीन पुरखा)**